# Shri Surya Stuti Nanabrahmanyakrita

# નાનાબ્રહ્માણ્યકૃતા શ્રીસૂર્યસ્તુતિઃ

## Document Information

Text title : Shri Surya Stuti Nanabrahmanyakrita

File name : sUryastutiHnAnAbrahmANyakRRitA.itx

Category : navagraha, mudgalapurANa, stuti

Location : doc_z_misc_navagraha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM ShaShTaH khaNDaH | adhyAyaH 42 | 6.42 8-19||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 5, 2024

*sanskritdocuments.org*

# નાનાબ્રહ્માણ્યકૃતા શ્રીસૂર્યસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥
નાનાબ્રહ્માણ્યૂચુઃ ।
વિકટાય પરેશાય સર્વજીવનધારિણે ।
આત્માકારાય સૂર્યાય ભાનવે તે નમો નમઃ ॥ ૮॥
સપ્તાશ્વરથસંસ્થાય વિઘ્નેશાય પરાત્મને ।
હેરમ્બાય જગન્નાથ બ્રહ્મનાથાય તે નમઃ ॥ ૯॥
સંજ્ઞાપતે નમસ્તુભ્યં સાક્ષિરૂપાય સાક્ષિણે ।
છાયાનાથાય દેવેશ દેવદેવેશ તે નમઃ ॥ ૧૦॥
અનામયાય નિત્યાય સહસ્રકરધારિણે ।
અનન્તભેદહીનાયાઽદ્વિતીયાય નમો નમઃ ॥ ૧૧॥
સર્વાદયે સદા સર્વાધારાય વિશ્વમૂર્તયે ।
કર્માધારાય સર્વેષાં પાલકાય નમો નમઃ ॥ ૧૨॥
આદિત્યાય પરેશાય પરાત્પરતરાય તે ।
દિનસ્ય પતયે નાથ દિનપાલાય વૈ નમઃ ॥ ૧૩॥
અર્યમ્ણે કાશ્યપાયૈવ તેજસાં પતયે નમઃ ।
અનાધારાય વૃષ્ટ્યાસ્તુ ચાલકાય નમો નમઃ ॥ ૧૪॥
કિં સ્તુમસ્ત્વાં રવે યત્ર વેદાઃ સઙ્કુણ્ઠિતા બભુઃ ।
યોગિનં સતતં સર્વ આત્માકારં પરાત્પરમ્ ॥ ૧૫॥
એકમેવાદ્વિતીયં ત્વાં વદન્તિ વેદવાદિનઃ ।
વયં ભિન્નાનિ તેન ત્વં વિકટોઽસિ ન સંશયઃ ॥ ૧૬॥
એવં સ્તુત્વા તં બ્રહ્માણિ પ્રણેમુર્હર્ષભાવતઃ ।
તાન્યુત્થાપ્યાર્યમા વાક્યં જગાદ ભક્તવત્સલઃ ॥ ૧૭॥
(ફલશ્રુતિઃ)
સૂર્ય ઉવાચ ।
વરાન્ બ્રૂત ચ બ્રહ્માણિ દાસ્યામિ ભક્તિયન્ત્રિતઃ ।

ભવત્કૃતમિદં સ્તોત્રં ભુક્તિમુક્તિપ્રદં ભવેત્ ॥ ૧૮॥
યં યમિચ્છતિ તં તં તુ દાસ્યામિ સ્તોત્રપાઠતઃ ।
બ્રહ્મભૂયપ્રદં મેઽસ્તુ સ્તોત્રં મદ્ભક્તિવર્ધનમ્ ॥ ૧૯॥

ઇતિ નાનાબ્રહ્માણ્યકૃતા શ્રીસૂર્યસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં ષષ્ટઃ ખણ્ડઃ । અધ્યાયઃ ૪૨ । ૬.૪૨ ૮-૧૯॥

- .. mudgalapurANaM ShaShTaH khaNDaH . adhyAyaH 42 . 6.42 8-19..

Proofread by Yash Khasbage, Preeti Bhandare

---

*Shri Surya Stuti Nanabrahmanyakrita*
pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*